[illegible]
गुरुकुल विश्वविद्यालय
कांगड़ी हरद्वार.

30

अथर्ववेद-संहिता ।

अनेकवैदिकानां साहाय्येन विविधप्राचीनलिखितपुस्तकपाठानुसारेण च

संशोध्य

सांतवलेकरकुलजेन दामोदरभट्टसूनुना श्रीपादशर्मणा

संपादिता

सा च

औन्धराजधान्यां

भारतमुद्रणालये मुद्रयित्वा स्वाध्यायमण्डलद्वारा प्रकाशिता ।

विक्रमीयसंवत् १९९५; शालिवाहनशकः १८६०

मूल्यं रूप्यकत्रयम् ।

मुद्रकः प्रकाशकश्च—

श्रीपाद्–दामोदर–सातवळेकरः

भारतमुद्रणालयम्, औन्ध–नगरम् (सातारा–प्रदेशे) मुम्बई-प्रान्ते ।

ॐ

अथर्ववेदविषयकः प्रस्तावः।

यस्मादृचो अपातक्षन्, यजुर्यस्मादपाकषन्।
सामानि यस्य लोमानि, अथर्वाङ्गिरसो मुखम्
स्कम्भं तं ब्रूहि, कतमः स्विदेव सः॥

(अथर्ववेदे १०-७-२०)

अथर्ववेद-नामानि।

अस्य श्रीसतोऽथर्ववेदस्य १ अथर्ववेदः, २ ब्रह्मवेदः, ३ अङ्गिरोवेदः, ४ अथर्वाङ्गिरसां वेदः, ५ भृग्वङ्गिरसां वेदः, ६ क्षत्रवेदः, ७ भैषज्यवेदः, इत्येवमादीन्यनेकानि नामधेयानि तत्र तत्र श्रूयन्ते। यथा-

१. अथर्ववेद इति गोपथे 'शं नो देवीरभिष्टय' इत्यारभ्य, 'अथर्ववेदमधीयते' (१।२९) इत्यत्र।
२. ब्रह्मवेद इत्यथर्ववेदे 'तमृचः सामानि यजूंषि ब्रह्म चानुव्यचलन्' (१५।६।८) इत्यत्र।
३. अङ्गिरोवेद इति शतपथे 'ता उपदिशति अङ्गिरोवेद' (१३।४।३।८) इत्यत्र।
४. अथर्वांगिरसां वेद इत्यथर्ववेदे 'सामानि यस्य लोमान्यथर्वांगिरसो मुखम्' (१०।७।२०) इत्यत्र।
५. भृग्वंगिरसां वेद इति गोपथे 'एतद्वै भूयिष्ठं ब्रह्म यद्भृग्वंगिरसः' (३।४) इत्यत्र।
६. क्षत्रवेद इति शतपथे 'उक्थं ... यजुः ... साम... क्षत्रं ... वेद' (१४।८।१४।२) इत्यत्र।
७. भैषज्यवेद इत्यथर्ववेदे "ऋचः सामानि भेषजा। यजूंषि होत्रा ब्रूम" (११।६।१४) इत्यत्र।

एतेषु चादितः पञ्च नामानि प्रायः सर्वत्र प्रयुज्यन्ते, तदन्यानि तु क्वचिदेव। तत्र 'अथर्वा-ब्रह्म-अङ्गिरा' इत्यादीनि नामानि सविशेषमुपयुज्यन्त इति तेषां निर्वचनविषयेऽपि किंचिदिवात्र विचार्यते।

नाम्नां निर्वचनानि।

१ अथर्ववेदः।

अमीषां ह्यथर्वादीनां नामधेयानां निर्वचनानि गोपथादि-ब्राह्मणग्रन्थेषु निरुक्तादिषु च बहुश उपलभ्यन्ते। यथा—

"अथर्वाणोऽथर्वणवन्तः। थर्वतिश्चरतिकर्मा तत्प्रतिषेधः" इति निरुक्ते (निरु० दै० ११।२।१७); तथा गोपथब्राह्मणे तु "अथ अर्वाग् एनं ··· ··· अन्विच्छेति, तद्यदब्रवीदथार्वाङेनमेतास्वेवाप्स्वान्विच्छेति तदथर्वाभवत्" इति (१।४) निर्वचनं दृश्यते।

*

यास्कीयनिर्वचनेन चित्तवृत्तिनिरोधात्मकः समाधिरूपश्चित्तस्थैर्यसाधको योगो लक्ष्यते । गोपथीयव्युत्पत्त्या समीपस्थस्यात्मनोऽर्वागेवान्वेषणं भवितुं योग्यमिति सूच्यते। श्रूयन्ते चैतयोर्निरुक्त्योरनुगतार्थताप्रत्यायकाः केचिन्मन्त्रा अस्मिन्वेदे, यथा—

मूर्धानमस्य संसीव्य, अथर्वा हृदयं च यत् । मस्तिष्कादूर्ध्वः प्रैरयत् पवमानोऽधि शीर्षतः ॥ २६ ॥
तद्वाथर्वणः शिरो देवकोशः समुब्जितः । तत्प्राणो अभि रक्षति शिरो अन्नमथो मनः ॥ २७ ॥
ऊर्ध्वो नु सृष्टास्तिर्यङ् नु सृष्टाः । सर्वा दिशः पुरुष आ बभूव ।
पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते ॥ २८ ॥ (अथर्व० १०।२।२६-२८)

इत्यादिषु मन्त्रेषु प्राणनिरोधपूर्वकेण हृदयमस्तिष्कसामञ्जस्यानुष्ठानेन ब्रह्मपुरःप्रवेशनं सुस्पष्टं समाम्नातम् । तत् पूर्वोक्ताभ्यां व्युत्पत्तिभ्यां सुतरां विशदीभवति । अथ चाथर्वणिकानां निर्मन्थ्याग्निनिर्माणं तद्द्वारा यज्ञपथसंतानन च स्पा वेदेषु । तथा हि—

तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । (ऋग्वेद ६।१६।१४; वा० य० ११।३३)
अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ॥
(ऋग्वेद १०।१४।६; वा० य० १९।५०; अथर्व० १८।१।५८)

इत्यादिषु दध्यङ्ङथर्वाणो भृगवश्चैते ऋषय आङ्गिरसगोत्रीया इत्युक्तम् । ते चाथर्वाणोऽग्निं मन्थनेन प्रथमं समुत्पाद्य यज्ञपथं समतनिषतेति श्रूयतेऽन्यत्र—

आग्निर्जातो अथर्वणा । (ऋ० १०।२१।५)
इममु त्यमथर्ववदग्निं मन्थन्ति वेधसः । (ऋ० ६।१५।१७)
अथर्वा त्वा प्रथमो निरमन्थदग्ने । (वा० य० ११।३२)
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः (ऋ० ६।१६।१३; वा० य० १५।२२)
यज्ञैरथर्वा प्रथमः पथस्तते ॥ (ऋ० १।८३।५)

इत्यादिषु मन्त्रेषु यज्ञमार्गस्य प्रथमप्रवर्तकत्वादेव च यज्ञे माननीयतमं ब्रह्मत्वमथर्ववेदविदेवार्हतीति निष्पाद्यते। प्रशस्यते च तस्यैवमृत्विक्त्वमुरुतररुचिरफलोपवर्णनेन—

तद्भद्राः समगच्छन्त वशा देष्ट्र्यथो स्वधा । अथर्वा यत्र दीक्षितो बर्हिष्यास्ते हिरण्यये ॥
(अथर्व० १०।१०।१७) इति ॥


२ ब्रह्मवेदः ।

'बृहत्वाद् बृंहणत्वाद्वा ब्रह्मेति ' निर्वचनेन ब्रह्मपदेन साक्षात्परं ब्रह्मैव गम्यते, तत्प्राप्तिरेवास्य वेदस्य साध्यमिति तत्तन्मन्त्रवर्णैः स्फुटतरं बोभवीति । यथा—


न वै तं चक्षुर्जहाति न प्राणो जरसः पुरा । पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते ॥ ३० ॥
अष्टाचक्रा नवद्वारा देवानां पूरयोध्या । तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः ॥ ३१ ॥
तस्मिन्हिरण्यये कोशे त्र्यरे त्रिप्रतिष्ठिते । तस्मिन्यद्यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः ॥ ३२ ॥
(अथर्व० १०।२।३०-३२)

इत्येतेषु मन्त्रेषु यथावद्ब्रह्मणः स्वरूपवर्णनं वेदस्यास्य ब्रह्मवेद-संज्ञाया अन्वर्थतां प्रथयतीत्यतिरोहितमेव । अतएव—

श्रेष्ठो हि वेदस्तपसोऽधिजातो ब्रह्मज्ञानां हृदये सं बभूव ॥ (गो० ब्रा० १।९)
एतद्वै भूयिष्ठं ब्रह्म यद्भृग्वंगिरसः । योंऽगिरसः स रसः । येऽथर्वाणस्तद्भेषजम् ।
यद्भेषजं तदमृतम् । यदमृतं तद्ब्रह्म । (गो० ब्रा० ३।४)



स्व० श्रीमान् सेठ **लीलाधर अमरसिंह**की चिर स्मृतियें,
उनके सुपुत्र (१) सेठ **देवराम लीलाधर,**
(२) ,, **कालीदास** ,, ,
(३) ,, **मगनलाल** ,, ,
(४) ,, **छगनलाल** ,, ,
(५) ,, **कल्याणजी** ,, ,
की ओरसे शुद्ध वेद मुद्रण के लिये धर्मभावसे



श्रीमान् सेठ **मथुरादास कालिदास महेता,**
दारेस्सलाम
की ओरसे शुद्ध वेदमुद्रण के लिए धर्मभावसे
५००) रु० प्राप्त हुए हैं ।

इत्यादौ गोपथब्राह्मणेऽयं वेदो ब्रह्मवेद इत्येव शश्वदुद्दिश्यते। आख्यायते च 'ब्रह्मविद् ब्रह्मैव भवति' इति। अत एतद्विद् ब्रह्मेत्युच्यते।

३-४ आङ्गिरसो भिषग्वेदश्च।

आंगिरसं मन्यन्तेऽगानां हि यद्रसः। (छां० १।२।१०)
आंगिरसोऽगानां हि रसः॥ (बृ० १।३।८)
प्राणो वा अंगानां रसः। (बृ० १।३।१९)

अङ्गेषु गात्रेषु यो रसः सप्तधातुमयो वर्तते, तमधिकृत्य या चिकित्सा साङ्गरसानां चिकित्सा। साऽस्मिन्नस्तीत्ययं वेदोऽङ्गरसवेदः सन्नेवांगिरसवेद इत्याख्यायते परोक्षेण। अस्याश्चिकित्सायाः प्रतिपादका मंत्राश्चाथर्ववेदे बहवः श्रूयन्ते। तेषामेकोऽनेकविधचिकित्साः श्रावयति यथा—

आथर्वणीरांगिरसीर्दैवीर्मनुष्यजा उत। ओषधयः प्र जायन्ते यदा त्वं प्राण जिन्वसि॥
(अथर्व० ११।४।१६)

इत्यादिषु हि मन्त्रेषु आथर्वणीः, आंगिरसीः, दैवीः, मनुष्यजा औषधयः चिकित्साकल्पाश्च वर्णिता दृश्यन्ते। एष चांगिरसवेद एव 'भिषजां वेदः' 'भैषज्यवेदः' इति वा प्रसिद्धः।

५ क्षत्रवेदः।

क्षत्र-वेद इति संज्ञा चात्र राज्यरक्षणार्थं युद्धादिकस्य समाम्नानेनान्वर्थैव। यद्यप्येता निरुक्तय आर्षत्वादादरणीयतमा एव सर्वेषां, तथापि 'अवाच्यः सर्वः स्वमतिपरिणामावधि गृणन्' इति न्यायेनास्मदीयायां धियां प्रतिभातामभिनवां कांचन निर्वचनसरणिमपीह सङ्कलयितुमुत्सहामहे। यथा—

अथर्ववेदस्यास्य पर्यालोचनायां स्फुटतरं प्रतीयते, यदस्मिन् षट्सहस्रमन्त्रसङ्घात्मकेऽथर्ववेदे ऋषेरथर्वणो मन्त्रसंख्या १७६८, ऋषेर्ब्रह्मणः ९६७, भृग्वङ्गिरसां च ६७० वर्तते। अन्येषामृषीणां मन्त्रसंख्या त्वितोऽल्पीयस्येव। यथा यमस्य १४६, सूर्यायाः १३९, शुक्रस्य १०६। एवमन्येषामप्यनेकेषां क्षुद्रसूक्तानां ज्ञातव्या। अतोऽथर्वदृष्टमन्त्रसंख्याभूयिष्ठत्वान् मन्त्रसंघातस्यास्य प्रथमं मुख्यं च नाम 'अथर्ववेदः' इति। तेनैव पथा यथाक्रमं द्वितीयं 'ब्रह्मवेद' इति, तृतीयं 'चांगिरसां वेद' इति। एवं ऋषिप्राधान्यमनुरुध्य प्रसिद्धानीमानि नामानीति युक्तमुत्पश्यामः। दृश्यन्ते च ऋग्वेदेऽपि गात्सेमद-गार्त्समद-वैश्वामित्र-वामदेव्यादयो मण्डलानां संज्ञा ऋषिप्राधान्येनैवेति, नात्र किञ्चनासामयिकं मन्यामहे।

त्रयी।

यत्तु कैश्चिदुच्यते- वेदसमवायस्य त्रयीति नाम त्रयाणां ऋग्यजुःसाम्नामेव बोधकं भवत्यतस्त्रयी-संज्ञकेषु वेदेष्व-थर्ववेदस्य संग्रहो न भवितुं योग्य इति, तदसमञ्जसमेव प्रतिभाति, त्रयीतिसंज्ञाया वेदगतमन्त्रत्रैविध्यनिदानत्वात्। ऋग्वेदेऽप्यथर्वणो वर्णनात्। तथाहि—

चत्वारि शृंगा त्रयो अस्य पादाः। (ऋ० ४।५८।६)

इत्यत्र 'चत्वारि शृंगाश्चत्वारो वेदा एव चत्वारि शृंगाणी' त्याबभाषे भगवान् पतञ्जलिः। यास्कोऽपि वेदा वा एते उक्ताः। (निरु० परि० १।७) इति निरवोचत्। एवमन्यत्रापि-

ऋचां त्वः पोषमास्ते... गायत्रं त्वो गायति... ब्रह्मा त्वो वदति० (ऋ० १०।७१।११)
यज्ञैरथर्वा प्रथमः पथस्तते। (ऋ० १।८३।५)

इत्यादिषु ऋङ्मन्त्रेषु अथर्वविस्कर्तृकाग्निविजयकर्तृत्वविशिष्टस्य ब्रह्मणोऽथर्वणस्य समादरेणोत्कीर्तनं दृश्यते, उपवर्ण्यते च ऋग्वेदेऽथर्वण इदं प्रथमतया निर्मथ्याग्निनिर्माणपूर्वकं यज्ञपथप्रथनमिति दर्शितमेव पुरस्तात्।

एतेन पुराथर्ववेदस्य यज्ञे समवायो नासीदित्याधुनिकानामनुमानमपि पराहतम्। विषये चास्मिन्सुबहुवक्तव्येऽप्यवसराभावात्तदन्यत्र वक्ष्यामः।

अथर्वपरिमाणम्।

१. अथ यत्कैश्चिदुच्यतेऽयमथर्ववेदो दशकाण्डात्मक इति, तन्न विचारसहम्, प्रमाणाभावात्।

२. अन्यैरुच्यतेऽथर्ववेदोऽष्टादशकाण्डात्मकः, तत्रान्त्येष्टिकर्मणः पितृमेधस्य वा समापनात्, इति। अस्मिन् पक्षेऽन्त्ययोः काण्डयोः प्रक्षिप्तत्वं परिशिष्टत्वं वा निष्पादितं भवति।

३. अन्यैः कैश्चिदेकोनविंशतिकाण्डात्मकोऽथर्ववेद इति मन्यते। एकोनविंशस्य काण्डस्यान्ते—

आयुरस्मासु धेह्यमृतत्वमाचार्याय। (अथर्व० १९।६४।४)
स्तुता मया वरदा वेदमाता प्रचोदयन्तां पावमानी द्विजानाम्।
आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसम्।
मह्यं दत्त्वा व्रजत ब्रह्मलोकम्॥ (अथर्व० १९।७१।१)
यस्मात्कोशादुदभराम वेदं तस्मिन्नन्तरव दध्म एनम्।
कृतमिष्टं ब्रह्मणो वीर्येण तेन मा देवास्तपसावतेह। (अथर्व० १९।७२।१)

इत्येतेषां मन्त्राणां समाप्तिसूचकत्वादत्रैव वेदोऽयं समाप्तिमगमत्। खिलवर्जं विंशस्य काण्डस्य त्ववैकल्येन ऋग्वेदादेवोद्धृतत्वात्परिशिष्टत्वमेवेत्यमीषां मतम्।

अथर्ववेदस्य सर्वानुक्रमण्यामप्येकोनविंशकाण्डपर्यंतमेव ऋष्यादि सङ्कलितम्, विंशस्य काण्डस्य तु ऋग्वेदसर्वानुक्रमणीत एवोद्धृतम्। दृश्यते च तत्रैकोनविंशकाण्डस्यांते 'भृग्वंगिरसां ब्रह्मेति भृग्वंगिरसां ब्रह्मेति' इति द्विरुक्तिः पर्यवसानसूचिका। विंशस्य च काण्डस्यारम्भ एव 'ऋषिदैवतछन्दांस्याश्वलायनानुक्रमानुसारेणानुक्रमिष्याम' इति वचनेन तस्य परिशिष्टत्वं ऋग्वेदात् संग्रहीतत्वं च सूचितम्। अतोऽयं पक्षः समीचीन इव भाति। विचारणीयैषा विचारसरणिर्विद्वद्भिरिति विज्ञापयामः।

४. अन्ये विद्वांसो विंशतिरेव काण्डान्यस्य वेदस्येति मन्यन्ते। ब्रह्मणो विंशतिर्ऋषयः सम्बभूवुस्तैर्विंशतिकाण्डानि दृष्टानीति गोपथेऽनुवर्णनात् (गो० ब्रा० १-५)। अस्मिन्पक्षेऽपि विंशं काण्डं ऋग्वेदादेव संगृहीतमिति समानमेव। अत एकोनविंशतिकाण्डात्मकोऽयमथर्ववेद इति पक्ष एव क्षोदक्षमः।

५. दृश्यते च पैप्पलाद-संहितायां काण्डानामेकोनविंशतिरेवेति पर्याप्तमुपबृंहणमत्र।

अस्माभिस्त्वत्र काण्डानां विंशतिरेव मुद्रिता, यतो विंशं काण्डं भवतु नाम परिशिष्टरूपम्, अस्तु वा कुतश्चन सङ्गृहीतम्, तस्याविच्छिन्नाध्ययनपरम्पराबलात्, गोपथ उपबृंहणदर्शनात्, वैतानसूत्रादिष्वत्रत्यमन्त्रविनियोगसत्त्वात्, भाष्यकारैः पृथग् व्याख्यातत्वाच्चास्य शौनकसंहिताया अवयवत्वं स्पष्टमेव॥

शाखाभेदाः।

अथर्ववेदाध्यायिनो हि नवधा भिद्यन्ते- पैप्पलादाः, तौदाः, मौदाः, शौनकीयाः, जाजलाः, जलदाः, ब्रह्मवदाः, देवदर्शाः, चारणवैद्याश्चेति। एषु पैप्पलादादि-शाखानामसु बहवः पाठभेदा वर्तन्ते। केचित्तु वेदस्यास्य पञ्चदश शाखा इति वदन्ति, परन्तु तासां नामानि नोपलभ्यन्ते। निर्दिष्टनवशाखास्विदानीं पैप्पलादानां शौनकीयानां चेति द्वयोरेव संहिते संप्राप्येते। अन्याः शाखासंहिता नूनं लुप्तप्राया एव, तासां प्राप्तये वैदिकैर्यत्नो विधेयः। तत्रैषा शौनकीयानां संहिता प्रकाश्यत इदानीमस्माभिः।

अथर्वप्रोक्तानि कर्माणि ।

अस्याः शौनकीय--संहिताया गोपथब्राह्मणे कौशिक-वैतान-नाक्षत्र-आङ्गिरस--शांतिक--कल्पानुसारेणानुवाकसूक्त-मन्त्राणां दृश्यते विनियोगो विविधेषु शांतिकेषु पौष्टिकेषु च कर्मसु। तथा--मेधाजननम् (१।१।१), अध्यात्मम् (१३।१-९), ब्रह्मचर्यसंपादनम् (११।५), ग्रामनगरदुर्गराष्ट्राणां शत्रुतोऽभिरक्षणम् (१२।१), पशुपुत्रधन-धान्यप्रजाकरितुरगादिसंपत्साधनम् (२।२६; ३।१०; ३।१४; ३।२३, ५।११), प्रजानामैकमत्यसंपादकं सांमनस्यम् (३।३०; ६।७३), राजकर्म, संग्रामजयसाधकं शत्रुसेना-संमोहनोद्वेजनस्तम्भनोच्चाटनादिकम् (३।१-२; ७।२०-२१), स्वसेनोत्साहाभयरक्षणम् (११।९-११), संग्रामे जयपराजयपरीक्षणम् (४।३१-३२), सेनापत्यादिविजयसाधनम् (५।३), शत्रूत्सादितस्य राज्ञः पुनः स्वराज्यप्रवेशनम् (३।३,४।८), नवशालानिर्माणम् (३।१२; ५।२६; ९।३), विविधभैषज्यानिर्माणम्, कृमिनाशनम्, हृद्रोगकामलाश्वित्रादिदोषनिवारणम् (३।१२; ५।२६; ९।३), विवाहगर्भाधानादिसौभाग्यसंवर्धनम् (२।३०; ५।२५; ६।११; १४।१-२), वाणिज्यलाभसम्पादनम् (३।१५), स्वस्त्ययनम् (६।९३), दीर्घायुष्यसम्पादनम (२।४; ५।२८) इत्येवमादीनि जनानामैहिकामुष्मिकफलप्राप्तिसाधकानि सन्ति वेदेऽस्मिन्सुबहूनि कर्माणि ।

अथर्ववेदे न केवलं ज्वरादिव्याधीनामपि तु सर्वेषामाधीनामपि निवारणोपायदर्शनात्प्रतीयते यद्वेदोऽयमशेषस्य मानुषजातस्य परमोपकारकत्वेन वरीवर्तीति ।

अथर्ववेदस्योपवेदाः ।

पञ्चोपवेदा भवन्त्यथर्ववेदस्यास्य । 'पञ्चवेदान्निरमिमीत सर्पवेदं पिशाचवेदं असुरवेदं इतिसहासवेदं चेति (गो० १। १०)। एष्वितिहासपुराणे एवोपलभ्येते इदानीम्, अन्ये तूपवेदा लुप्तप्रायास्ते संशोधकैरन्वेष्टव्या इति । उपवेदविषये च शातपथीयं वचनमिदं दर्शनीयमत्र—

(१) मनुर्वैवस्वतो राजेत्याह । तस्य मनुष्या विशस्ते... गृहमेधिनः, तानुपदिशत्यृचो वेदः...। (२) यमो वैवस्वतो राजेत्याह। तस्य पितरो विशस्ते... स्थविराः... तानुपदिशति यजूंषि वेदः... । (३) वरुण... आदित्यो राजेत्याह। तस्य गन्धर्वा विशस्ते... युवानः... तानुपदिशति अथर्वाणो वेदः...। (४) सोमो वैष्णवो राजा... तस्याप्सरसो विशः ताः शोभना युवतयः... ता उपदिशति अंगिरसो वेदः...। (५) अर्बुदः काद्रवेयो राजा... तस्य सर्पा विशः...तानुपदिशति सर्पविद्यावेद इति । (६) कुबेरो वैश्रवणो राजेत्याह। तस्य रक्षांसि विशः... तानुपदिशति देवजनविद्यावेद इति । (७)असितो धान्वो राजेत्याह। तस्यासुरा विशः, ते इमे... कुसीदिन उपसमेता भवन्ति तानुपदिशति मायावेदः... । (८) मत्स्यः सांमदो राजेत्याह। तस्योदकेचरा विशः ते मत्स्या मत्स्यहनश्च... तानुपदिशति इतिहासो वेदः... । (९) तार्क्ष्यो वैपश्यतो राजेत्याह तस्य वयांसि वयोविधिकाश्च विशः तानुपदिशति पुराणं वेदः । (१०) धर्म इन्द्रो राजेत्याह। तस्य देवा विशः... तानुपदिशति सामानि वेद इति । (शतपथब्राह्मण १३।४।३।३-१४)

अत्र ऋग्यजुरथर्वाङ्गिरःसर्पविद्यादेवजनविद्यामायेतिहासपुराणसामेत्येतेषु दशसु वेदेषु चतुर्णां वेदानां षण्णामुपवेदानां चोल्लेखोऽस्ति । एतेषु चाथर्वणे पंचानामुपवेदानां संग्रहो दृश्यते । किन्त्वेत उपवेदाः प्रायो नैवोपलभ्यन्त इदानीम् । अतस्तद्विषये किंचिदपि वक्तुं न शक्नुमः । नानाविधप्राचीनविद्योद्धरणबद्धपरिकरैर्धीरधौरेयैस्तदन्वेषणेऽध्ययने च विधेयः प्रयत्न इत्याशास्महे ।

अथर्वपाठभेदाः ।

ऋग्वेदे यजुर्वेदस्य तैत्तिरीयसंहितायां वाजसनेयिसंहितायां वा नैव पाठभेदाः समुपलभ्यन्ते, अथर्ववेदे तु बहवः पाठभेदा दृश्यन्ते । किंबहुना, अस्याः संहिताया नैकमपि काण्डं पाठभेदरहितं दृश्यत इदानीम्। सर्वे च पाठभेदा ग्रन्थ-

स्यास्यान्ते परिशिष्टे दत्तास्तत एव च सुधीभिरनुसन्धेयाः । अस्य हेतुरेक एव सम्भाव्यते– यदृचां यजुषां चाविच्छिन्नः पठनपाठनसम्प्रदायोऽद्यावधि वर्तते, तयोर्हि संहिता-पद–जटा–शिखा–माला-रेखा–ध्वज–दण्ड–घनादि–प्रकृति–विकृति-पाठकास्तत्र तत्र परिदृश्यन्त इदानीमप्यनूचानाः, न तु तथाथर्ववेदस्येति संप्रविष्टास्तत्र पाठभेदा इति नैव चित्रम् ।

ये त्वङ्गुलीनिर्देश्याः काश्यामयोध्यायां वा केचनाथर्ववेदिनः सन्तीदानीम्, ते प्रायशो महाराष्ट्रीया मूलत ऋग्वेदिन एवाथर्ववेदे कृतपरिश्रमाः । सर्वात्मनाऽननुकूलेऽप्यस्मिन्समये प्रणष्टप्रायाया अथर्ववेदाध्ययनपरम्परायाः पुनः प्रवर्तकास्ते सर्वेषामेव धन्यवादानर्हन्तीति मन्महे । आशास्महे च यदेतैः पुनरुद्धृतोऽथर्वसम्प्रदायो न चिरादेव प्रसरिष्यतीति । तथापि पूर्वमेव ये पाठभेदा वेदेऽस्मिन्समाविष्टाः सन्ति, ते कथं नामैकपद एवापसर्प्स्यन्ति? एष हि परम्परालोपादुद्भूतो दोषः । समग्रस्याथर्ववेदस्य घनपारायणं कर्तुं शक्तो नैकोऽपि विद्यत इदानीं वैदिकः । अस्यास्तु शौनकीय–संहिताया अध्येतारो यत्र तत्रोपलभ्यन्तेऽपि, परन्तु पिप्पलादसंहिताध्यायी न कश्चन श्रवणपदवीमप्युपयाति । अतएव यत्प्रभूताः पाठभेदा उपलभ्यन्तेऽत्र, तन्निदानमध्येतृवैरल्यमेवेति भाति ।

आस्तां तावल्लेखकाध्येतृप्रमादजन्यमध्येतृवर्गाव्युत्पत्तिजन्यं वा पाठभेदजातमत्र वेदे । अवकाशाभावान्न तत्सर्वमधिकृत्यास्माभिरत्र किंचिदालोच्यते । परन्त्वस्याथर्ववेदस्य चतुर्दशे काण्डे द्वितीये सूक्ते सप्तदशाष्टादशयोर्मन्त्रयोर्मध्ये दृश्यमान एकः पाठभेदो वैवाहिकमन्त्रगतत्वान्नोपेक्षणमर्हतीति तद्विषये किञ्चिदिवात्र विमृशामः ।

सर्वं चतुर्दशं काण्डं विवाहविषयकम्। तत्तु प्रायः ऋग्वेदादेवोद्धृतं संवर्धितं च भवितुमर्हति। ऋग्वेदीये हि दशमे मण्डले पञ्चाशीतितमं 'सत्येनोत्तभितेति' सूक्तं सूर्यासावित्रीदृष्टं विवाहविषयकं वर्तते, तत्सप्तचत्वारिंशन्मन्त्रात्मकं दृश्यते ऋग्वेदे । तदेव चैकोनचत्वारिंशदधिकशतमंत्रात्मकमस्मिन्नथर्ववेदे दृश्यते । उभयत्र सैव सूर्यासावित्री ऋषिका, विवाहश्च देवतारूपेण विषयः । अस्मिन् माङ्गलिके विवाहकर्मणि विनियुज्यमान आशीर्वचनपर एको मंत्रः ऋग्वेद एवं दृश्यते—

अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥ (ऋ० १०।८५।४४)

एष एव मन्त्रो द्विधाभूतो दृश्यतेऽथर्ववेदे—

अघोरचक्षुरपतिघ्नी स्योना शग्मा सुशेवा सुयमा गृहेभ्यः ।
वीरसूर्देव (वृ)- कामा सं त्वयैधिषीमहि सुमनस्यमाना ॥१७॥
अदेवृघ्न्यपतिघ्नीहैधि शिवा पशुभ्यः सुयमा सुवर्चाः।
प्रजावतीर्वीरसूर्देव(वृ)-कामा स्योनेमग्निं गार्हपत्यं सपर्य ॥१८॥ (अथर्व० १४।२।१७-१८)

अत्र च लिखितपुस्तकेषु 'देवकामा' इति 'देवृकामा' इति च पाठद्वैविध्यं दृश्यते । वेदपाठका अपि देवकामेति पाठः क्काचित्कः, देवृकामा इति तु बहुलमिति वदन्ति । एवं पाठद्वैविध्ये कः श्रेयानिति महत्यत्र विचिकित्सोदेति । अस्माभिस्त्वत्र 'देवकामा' इति पाठ एवाङ्गीकृतः, परं तत्र प्रत्यवतिष्ठन्ते केचन पुरोभागिनः । पैप्पलादसंहितायामपि 'देवकामा' इत्यस्य समुपलभ्यमानत्वात् 'देवकामा' इत्यस्यैव श्रेयस्त्वं संवर्धते । अतो निश्चयनीयोऽसौ पाठ इति तदुपस्तम्भकानि कानिचित् प्रमाणान्यत्र संगृह्यन्ते—

१. ऋग्वेदे दशमे मण्डलेऽस्मिन्विवाहसूक्ते 'वीरसूर्देवकामा' इत्येक एव पाठो भारतीयैः सर्वैरध्येतृभिः प्रमाणभूतैर्लेखकैश्च समस्वरमेवोररीक्रियते, न हि तत्रान्यपाठसंशयलेशोऽपि कस्यचित् स्फुरति । एवं सामवेदीय–मंत्रब्राह्मण-मानवगृह्यहिरण्यकेशिगृह्यपारस्करगृह्यादिष्वपि 'देवकामा' इत्येव पठ्यतेऽस्मिन्मन्त्रे ।

२. भारतमुद्रिते यूरोपमुद्रिते च ऋग्वेदे, ऋग्वेदपदसूच्यां, सभाष्ये ऋग्वेदे, अमेरिकामुद्रिते वेदसमन्वये (Vedic Concordance) च सर्वैरेव ऋग्वेदे 'देवकामा' इत्येकमेव पदमङ्गीकृतम् । केवलं सेन्टपीटर्सबर्गकोशे ऋग्वेदपाठो 'देवृकामा' इति लिखितः तमनुसृत्यैव च जर्मनमुद्रितायां शौनकीयाथर्वसंहिताभूमिकायां पाठभेदप्रकरणे 'देवृकामा'

इति पाठः सूचितः । तमनुसरद्भिरजमीर–वैदिक–यन्त्रालयस्थ–पण्डितैर्मुद्रिते ऋग्वेदे संस्कारविधौ च 'देवृकामा' इत्येव पाठः स्वीकृतः । किन्त्वसमीचीन एष पाठ इति कृत्वा नान्यैः कैश्चिदप्यंगीकृतः । इदानीं तु सर्वैरपि 'देवृकामा' इति पाठ ऋग्वेदे तिरस्क्रियते, ऐकमत्येन स्वीक्रियते च 'देवकामा' इत्येक एव पाठ ऋग्वेदे ।

३. मोक्षमुल्लरमुद्रिते ऋग्वेदपाठे, कुम्भकोणमुद्रिते निर्णयसागरमुद्रिते च पदपाठे 'देवकामा' इत्येक एव पाठः स्वीकृतः । भट्टमोक्षमुल्लरेण ऋग्वेदपदपाठविषये महती गवेषणा कृता, परन्तु पदस्यास्य विषये न कोऽपि पाठभेदः प्रदर्शितः । स्वीकृतश्च तेन ऋग्वेदे 'देवकामा' इत्येक एव पाठः ।

४. म० मोनियर विल्यम्‌निर्मिते संस्कृताङ्ग्लकोशे ऋग्वेदे देवकामेत्येक एव पाठो दर्शितः ।

५. मुम्बय्यां निर्णयसागर–यन्त्रालयेऽनेकवारं मुद्रितो दृश्यते ऋग्वेदः । तत्र 'देवकामा' इत्येव पाठः स्वीकृतः । एवमेव गणपतकृष्णाजी–मुद्रितेऽपि ।

६. पुण्यपत्तनमुद्रिते सायणभाष्यसहिते ऋग्वेदे 'देवकामा' इत्येव पाठोऽङ्गीकृतः । पं० मोक्षमुल्लरेण द्विवारं ओक्स-फोर्डनगरे मुद्रित ऋग्वेदः, तत्राप्ययमेव पाठस्तेन स्वीकृतः ।

७. म० विल्सन–महोदयेनानुवादिते ऋग्वेदे 'देवकामा' इति पाठमुररीकृत्य (Be devoted to Gods) देवान्कामयमाना भव इत्येवानूदितम् । म० ग्रिफिथ महोदयोऽपि स्वीये ऋग्वेदानुवादे 'देवकामा' इति पाठं स्वीकृत्य (Loving the Gods) देवान्कामयमाना इत्यनूक्तवान् ।

८. सामवेदमन्त्रब्राह्मणे 'देवकामा' इति पाठो दृश्यते ।

९ पारस्करगृह्यसूत्रे (१।४।१५ इत्यत्र) 'देवकामा' इत्येक एव पाठोऽङ्गीकृतः । (पं० लधारामशर्मासम्पादितं मुम्बय्यां १९४५ खिस्ताब्दे मुद्रितं द्वितीयं पृष्ठं द्रष्टव्यम् ।)

१०. हिरण्यकेशीये गृह्यसूत्रे (१।१।४ इत्यत्र) 'देवकामा' इत्येव पाठः स्वीकृतः ।

११. आपस्तम्बीये मन्त्रपाठे (१।१।४ इत्यत्र) 'देवकामा' इत्येव पाठो दृश्यते ।

१२. मानवगृह्यसूत्रे (१।१०।६ इत्यत्र) 'देवकामा' इत्येव पाठ उपलभ्यते (भारतवर्षमुद्रितं वा डा० फ्रेड्रीक कॉरद्वारा सम्पादितं सेन्टपिटर्सबर्गमुद्रितं सूत्रं द्रष्टव्यम् ।)

१३. एवं सर्वत्र धर्मसूत्रे गृह्ये, ब्राह्मणग्रन्थे वा वैवाहिके प्रकरणेऽन्यत्र वा प्रयुक्तः पाठो 'वीरसूर्देवकामा' इत्येक एव दृश्यते । नैकत्रापि धर्मसूत्रे, गृह्ये ब्राह्मणग्रन्थे वा 'देवृकामा' इति केनाप्यङ्गीकृतः पाठः ।

एवं यदि वैदिकसूत्रादिग्रन्थप्रामाण्यं विचार्येत, तर्हि सर्वैरेतैर्ग्रन्थकृद्भिर्वैवाहिके कर्मणि 'देवकामा' इत्येक एव पाठः समादृत इति स्पष्टम् ।

अथ तमिमं प्रबलतमं ऋग्वेदपाठोपस्तम्भमवलम्ब्याथर्वणपाठमधिकृत्य किंचिल्लिख्यते—

१. अथर्ववेदस्य लिखितपुस्तकानि द्विविधानि समुपलभ्यन्ते, तत्र केषुचित् (१४।२।१७-१८) 'देवकामा' इति पाठो दृश्यते, केषुचित्तु 'देवृकामा' इत्यपि । अथर्ववेदाध्येतारोऽपि 'देवकामा' इति क्वाचित्कः पाठः 'देवृकामा' इति तु बहुमतः इति वदन्ति । न चैष पाठभेदो देशभेदप्रयुक्तो भवितुमर्हति, अविशेषेणौत्तरेषु दाक्षिणात्येषु च पाठद्वयस्याप्यस्य समुपलभ्यमानत्वात् ।

२. स्वर्गीयैः शङ्करपाण्डुरंगपण्डितैः संशोधिते मुम्बय्यां मुद्रिते सायणभाष्यसहितेऽथर्ववेदे 'देवृकामा' इत्येक एव पाठो दृश्यते । नैतैः कोऽप्यन्यः पाठभेदः प्रदर्शितोऽत्र । अतोऽनुमीयते यदेतेषां निकटे येऽथर्ववेदग्रंथाः संगृहीतास्तेषु 'देवृकामा' इत्येव पाठ आसीदिति ।

३. श्री० व्हिटने महोदयेनानुवादितेऽथर्ववेदे अस्य मन्त्रस्य टिप्पण्यां (In some manuscripts देवकामा कतिपयेषु ग्रंथेष्वत्र 'देवकामा इति पाठो दृश्यते' इत्युक्तम्। अथर्वकाण्डे १४।२।१७ इति मंत्रस्य टिप्पण्यां स एव (पृ० ७५६) पुनः [Our manuscripts are divided in C between देवकामा and देवृकामा. The majority (not BP, BS, PM, C. O. D.) having with RV and Ppp; the latter which is therefore more probably the true reading.]

"अस्माकं सन्निधौ यान्यथर्ववेदसंहिता-पुस्तकानि सन्ति तानि द्विविधपाठयुक्तानि सन्ति, कतिपयेषु 'देवृकामा' इति अन्येषु च 'देवकामा' इति पाठो दृश्यते" इति लिखित्वा स्वीयेऽनुवादे देवृकामा इति पाठं स्वीकृत्य (Loving brothers-in-law?) देवरं कामयमाना (?) इति संदेहचिह्नेन सहानूदितमङ्कितवान्। स्वीये देवनागराक्षरैर्मुद्रितेऽथर्ववेदे तु स्वयमेव 'देवकामा' इति पाठं च स्वीकृतवान्! अतस्तस्यैतत्पाठविषये संदेह एवेति स्पष्टं प्रतीयते।

अथर्ववेदे तु म० ग्रिफिथेन द्वयोरपि मंत्रयोः स्थाने 'Love thy husband's father स्वपतेः पितरं कामयेत्यनुवादः कृतः। अत्रानुमीयते यत् Brother (भ्रातृ-) स्थाने Father (पिता) इति पदं मुद्रणाशुद्धिजन्यमिति। अशुद्धत्वाच्चैतदप्रामाणिकमेवेति नास्ति सन्देहलेशोऽपि।

४. लिखित-ग्रन्थेषु द्विविधं पाठं पश्यद्भ्यामपि आर. रोथ-डब्ल्यू. डी. विटनी महोदयाभ्यां जर्मन्यां बर्लिननगरे ख्रि० १९२४ मुद्रितेऽथर्ववेदे (कां० १४।२।१७-१८ इत्यत्र) 'देवकामा' इत्येव पाठो मुद्रितः।

५. भारते शिलामुद्रितेऽथर्ववेदे 'देवकामा' इत्येव पाठो मुद्रितः।

६. पिप्पलाद-संहितायां त्वथर्ववेदस्य 'देवकामा' इत्येव पाठोऽस्ति निश्चितः। प्रमाणं चैतत्प्रबलमस्य पाठस्योपादेयत्वे इति मन्यामहे।

६. वयं तु ऋग्वेदीय-मन्त्र इव सर्वात्मना तदभिन्नेऽत्र मन्त्रे 'देवकामा' इत्येव पाठो युक्त इति प्रतीमः।

अर्थनिर्णये तदनुसारिणि पाठनिश्चये च सूक्ष्ममतिभिरालङ्कारिकैरौचितीं स्मरद्भिरत्र मंत्रार्थं विमृशद्भिरस्माभिश्च वैवाहिके मङ्गले वध्वास्तत्प्रथमपतिगृहप्रवेशनविधौ, संमिलितैः सम्बन्धिभिरिष्टैश्च शिष्टैः स्त्रीपुरुषैर्दम्पत्योर्मङ्गलं कामयद्भिः दीयमान आशीर्वचने 'देवृकामा भव' इत्याशंसनं युक्तमिति नैव मन्तुं शक्यते। देवरं कामयेति सर्वात्मनानुचितार्थकात् देवृकामा इति पदात्, देवान् उपास्स्वेति भावदर्शकं 'देवकामा' इति पदमेव प्रसङ्गानुगुणमिति नः प्रतिभाति।

किञ्च, अत्रोच्यमानं देवकामाया गार्हपत्याग्निसपर्याकरणमनतिव्यवहिते मंत्रान्तरे 'सुमङ्गल्युपसीदेममग्निं सं पत्नी प्रति भूषेह देवान्।' (अथर्व० १४।२।२५) इति पुनः स्पष्टतरं श्रूयमाणं सूक्ष्मया धिया विभावयन्तः, अस्पष्टानां मन्त्राणां स्पष्टैर्मन्त्रान्तरैरर्थावधारणं मीमांसासम्मतमित्यभ्युपगच्छन्तः, देवरं कामयितुं गार्हपत्यसपर्योपदेशस्य सुतरामसङ्गतत्वमिति जानन्तश्च न केऽपि विप्रतिपद्येरन्नत्र सहृदया इति विश्वसिमः"।

अस्मिन्नेव च मंत्रे 'अदेवृघ्नी' इति पदं पश्यतां साहित्यसारविदां हृदयमुद्देश्यप्रतिनिर्देश्यत्वाद्यभावेऽपि देवृपदस्य पुनः प्रयोगं कथमिव युक्तं मन्येत?

एवं 'देवकामा' इति पाठस्य प्रामाणिकत्वसाधनेन 'देवृकामा' इति पाठस्यासारता स्वत एव सिद्ध्यति। न च दुर्जनपरितोषन्यायेनात्र स्वीकृतेऽपि 'देवृकामा' इति पाठे नियोगसाधकानामभिमतार्थसिद्धिर्भवितुं शक्या। धर्मशास्त्रे 'अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया।' (याज्ञ० १।६८) इत्यादिना अपुत्राया विधवाया एव देवरेण नियोगस्याभ्यनुज्ञानात्। श्रूयते च मंत्रेऽपि 'को वां शयुत्रा विधवेव देवरं (ऋ० सं० १०।४०।२) इति।

किंतु विवादास्पदेऽस्मिन् मन्त्रे सूक्ते च सर्वत्रावैधव्यं पतिलोकप्राप्तिश्चाशास्यते। वधूश्चेयं न केवलं प्रजावती,

वीरसूरिति। कथं नामात्र नियोगविधानस्य गन्धोऽपि सम्भवेत् ? उक्तं च स्पष्टमेव वेदपारावारपारदृश्वना भगवता मनुना 'नोद्वाहिकेषु मंत्रेषु नियोगः कीर्त्यते क्वचित् ।' (९।६५) इति ।

तदस्य देवृकामा–पदस्य पुत्रकामा-पदस्येव देवराणां सत्तामिच्छन्तीत्येवार्थः प्रत्येतव्यः। 'प्रतीक्षन्ते श्वशुरो देवरश्च' अथर्व० १४।१।४९) 'सम्राज्ञ्येधि श्वशुरेषु सम्राज्ञ्युत देवृषु । (अथर्व० १४।१।५५) इत्यादि मन्त्रलिङ्गान्यप्यत्र निर्दिष्टार्थोपोद्वलकानीति सर्वथा वृथैवात्मायास्यतेऽत्र नियोगविधिसाधकैर्मृगतृष्णिकानुधावनेनेत्यास्तां तावत् ।

एवमुपलभ्यमानेऽस्मिन् पाठद्वये यावद्बुद्धिबलं विमृश्य 'देवकामा' इति पाठ एवाश्रितोऽस्माभिः। इतःपरं तद्युक्तत्वा-युक्तत्वानिर्धारणं तु गुणगृह्येषु सहृदयेष्वेवायतते ।

सर्व एवात्रत्याः पाठभेदा एवमेव सूक्ष्मेक्षिकया निरीक्ष्य परीक्ष्य चावधारणमर्हन्तीति जानीमहे । जिघटिषामहे च तद्विषये यावन्मनीषमवसरान्तरे महोदयानामनुग्रहेणेति सविनयं निवेद्य प्रकृतमनुसरामः ।

संशोधकानामभिनन्दनम् ।

अथाथर्ववेदस्यास्य संशोधनकर्मणि महाभागैर्यैरथर्वविद्भिः साहाय्यं कृतं तेऽमी —

१	श्री वेदमूर्तयो		रामचन्द्रभट्टाः रटाटे आहिताग्नय ऋग्वेदाथर्ववेदिनो दरभंगापाठशालाचार्याः।	काशीस्थाः।
२	,,	,,	सखारामभट्टवैद्याः अथर्ववेदिनो गोयन्काविद्यालयाथर्ववेदाध्यापकाः।	,,
३	,,	,,	धुण्डीराजशास्त्रिणः रटाटे अथर्ववेदिनः।	,,
४	,,	,,	नारायणभट्टा घुले अथर्ववेदिनः।	,,
५	,,	,,	रामचन्द्रभट्ट-गोपीनाथभट्ट-आठवले श्रौतभूषणा वैदिकरत्नाः ऋग्वेदाथर्ववेदिनः।	,,
६	,,	,,	कृष्ण–विद्याधरभट्टाः-दीक्षिताः लेले अथर्ववेदिनः	अयोध्यावासिनः
७	,,	पं०	अमृतरामाचार्याः पण्ड्या याज्ञिकभूषणा उपाध्यायाः धर्मशास्त्राचार्याः।	मथुरावासिनः

एतैर्विद्वद्धरैरस्याथर्वमुद्रणस्य पत्राणि संशोध्य समये समयेऽस्माकं संशोधनकाठिन्यमपसारितम् । एतेषां धर्मधुरीणानां पयैतद्वेदस्यास्य प्रकाशनं सारल्येन समाप्तिमगत; अतस्ते सर्वे सविशेषं संमाननीया अभिनन्दनीयाश्च । यदि हि तेषाम-त्रिमं सहायकं नाभविष्यत्, तर्हि दुष्करमेवाभविष्यदथर्वण आविष्करणमिदमिति ।

अथर्ववेदस्य बृहत्सर्वानुक्रमणिका ।

अथर्ववेदीया बृहत्सर्वानुक्रमणिका श्रीमद्भिः पण्डितैः लाहोरनिवासिभी रामगोपालशास्त्रिभिः संशोध्य प्रकाशिता इदानीमुपलभ्यते । द्वितीया लघुसर्वानुक्रमणिकाऽपि वर्तते । एतामेवाथर्ववेदबृहत्सर्वानुक्रमणिकामाश्रित्यात्र ऋषिदैवत-छन्दांसि लिखितानि ।

एषा सर्वानुक्रमणिका चतुर्वेदभाष्यकारैः सायणाचार्यैर्नोपलब्धा वोपेक्षिता वेति न निश्चीयते । तैस्तु स्वीये भाष्येऽथर्ववेदस्य ऋषिदेवताच्छन्दांसि नैव निर्दिष्टानि, इत्यतोऽनुमीयते, सैषा सर्वानुक्रमणी तत्समये नासीदिति; मानयोग्या वा नाभवदिति वा अत एव तैरुपेक्षिता नादृता वा ।

यदि पुनरियं सर्वानुक्रमणिका भाष्यविरचनादूर्ध्वं निष्पन्ना भवेत्, तर्हि नियतं भाष्यमनुसरेत् । न च तथा दृश्यते ।

यत: प्रथमकाण्डे द्वितीयं सूक्तमधिकृत्य भाष्यकारा वदन्ति 'अस्य सूक्तस्येन्द्रदेवताकत्वात् ।' (१।२।२) इति अनुक्रमण्यां तु 'द्वितीयं चांद्रमसं पार्जन्यम्' (१।४) इत्यन्यथैवोपलभ्यते । अतः सर्वानुक्रमणीकारेण भाष्यं नावलोकि तमिति सिद्ध्यति । प्रादुर्भूतस्यापि भाष्यस्यानवलोकनमनादरणं वा नोपपद्यते । अतः संभाव्यते सैषा सर्वानुक्रमण भाष्यात् पूर्वतनैवेति । भाष्येऽनुल्लेखस्त्वस्या अनादरादेव । तथा हि—

ऋग्वेदस्य शुक्लयजुर्वेदस्य च कात्यायन-निर्मिता सर्वानुक्रमणी यथा व्यवस्थिता दृश्यते न तथैषा। अत्र नैव समीचीन परिभाषा, नापि आर्षी भाषा, न पदलाघवं, न च काचिद्विशिष्टा परिपाटी दृश्यते । अनावश्यकपदानां समाम्रेडनमस्य अनार्षत्वस्य द्योतकत्वे पर्याप्तं प्रमाणमस्ति। यथा गायत्रीछन्दसो नित्यत्रिपादत्वेऽपि अत्रानेकत्र 'त्रिपदा गायत्री' इत्येवोक्तम्

अनावश्यकपदानामाम्रेडनेन, स्वयमुद्दिष्टानामपि परिभाषाणां स्वैरमुल्लङ्घनेन, तत्र तत्र मन्त्रलिङ्गविसंवादि-देवता कल्पनेन, अन्यैश्च बहुविधैर्दोषैराविलेयं नार्षीत्यवलोकनसमकालमेव प्रतीयते । अस्यां मुद्रणदोषा अपि प्रभूततमाः, यथ (२०।२२।१ इत्यत्र) 'षट्त्रिशोक' इति वक्तव्ये 'षट्त्रिंशद्' इति मुद्रितम्; (२०।२१।१ इत्यत्र) 'सव्य' इति वक्त 'सद्य' इत्येव मुद्रितम् । एवमेवानेकेषु स्थलेषु प्रमादबाहुल्यं दृश्यते ।

अनार्षेऽप्यस्मिन् ग्रन्थेऽनेकदोषबहुलेऽपि शुद्धतरस्यान्यस्य ग्रन्थस्याभावादेनमाश्रित्यैवात्र ऋषिदैवतच्छन्दांसि समुल्लिखिता नि । तेषु बहूनि पुनर्विचारार्हाणि सन्ति । तत्संशोधनं तु श्रीमद्भिः पण्डितवरैर्वेदाभ्यासतत्परैरनन्तयज्ञेश्वरधूपकर इत्यै क्रियत इदानीम् । यदा तत्संपत्स्यते, तदा तदित एव प्रकाशीभविष्यति ।

आदर्शग्रन्थाः ।

अस्याथर्ववेदस्य मुद्रणकर्मणि सहायीभूता आदर्शग्रन्थास्त्वेते-(१) स्व० शंकरपांडुरंगपण्डितैः संशोध्य प्रकाशित सायणभाष्यसहितो निर्णयसागरमुद्रितोऽथर्ववेदः, (२) जर्मन्यां बर्लिननगरे म०रोथ-व्हिटने महोदयाभ्यां संपादितो मुद्रि तश्चाथर्ववेदः, (३) शिला-यंत्र-मुद्रितोऽथर्ववेदः, (४) काशी-संस्कृत-महाविद्यालय-(कालेज) ग्रंथालयस्थो लिखित डा० मंगलदेवशास्त्रिणां कृपया प्राप्तोऽथर्ववेदः, (५) पुण्यपत्तनस्थ भांडारकर-प्राच्यविद्यासंशोधकसंस्थानस्थ-(ओरिएन्टल रिसर्च- इन्स्टीट्यूट-स्थ) लिखितग्रन्थाः, संहिता-पद-पाठ-ग्रन्थाश्चाथर्ववेदस्य, (६) अष्टे-नगरात् श्री शम्भुरा गोविंदराव लिमये इत्येतेषां संग्रहाल्लब्धोऽथर्ववेदः, (७) काशी, अयोध्या, मथुरा इत्यादिस्थानेभ्यो लब्धानि वैदिक-पठनपाठनपद्धत्या संशोधितानि कतिपयानि लिखितपुस्तकानि अथर्ववेदस्य । सर्वैरप्येतैर्ग्रन्थैः पाठसंशोधनकर्मणि महत्साहाय्यं सम्पादितम् ।

एवमीश्वरकृपया संशोध्य मुद्राप्य च प्रकाशिता शौनकीयैषाथर्ववेदसंहिता वैदिकधर्मश्रद्धावतामादरस्थानं प्राप्स्यत त्याशास्ते ।

औन्ध नगरे
शके १८६० पौषस्य शुद्धनवम्याम् । } सातवळेकरकुलजो दामोदरभट्टसूनुः श्रीपादशर्मा ।

विषयसूची ।

(१) अध्यात्मप्रकरणम् ।

ब्रह्मचर्यप्रकरणम् ।

गृहस्थप्रकरणम् ।

वानप्रस्थसंन्यासप्रकरणे ।

आयुर्वेदप्रकरणम् ।

आयुर्वर्धनम् ।

विविधौषधि-भैषज्यादि ।

रोगादिनिवारणम् ।

क्रिमिनाशनम् ।

विषनाशनम् ।

अरिष्टनाशनम् ।

(२) अधिभूतप्रकरणम् ।

राज्यशासनम् । विजयसाधनम् ।

राजराष्ट्रशासनम् ।

संग्रामादिकम् ।

शत्रुनाशनम् ।

मणिधारणम् ।

अस्तृतमणिः १९।४६; औदुम्बरमणिः १९-३१
जङ्गिडमणिः १९-३४,३५; दर्भमणिः १९-२८, २९, ३०
प्रतिसरो मणिः ८-५; मणिबंधनम् १०-६
शतवारो मणिः १९-३६; शंखमणिः ४-१०
सपत्नक्षयणो वरणमणिः १०-३

पापादिनाशनम् ।

अरातिनाशनम् ५-७; अवनम् १९-६५
उन्मोचनम् ६-११४; एनोनाशनम् ६-५१
दुरितनाशनम् ७-६३, ६५; दुःखनाशनम् ३-९
दुःखमोचनम् १६-१; दुःष्वप्ननाशनम्६-४५,४६;७-२३, १००,१०१; १९-५६,५७; निर्ऋतिमोचनम् ६-८४
पापनाशनम् ४-३३; ७-११२; पापमोचनम् ४-२३,२४, २५, २६, २७, २८, २९; ६-११५;७-४२,६४;११-६
पापलक्षणनाशनम् ७-११५; पापशमनम् ६-३०, ११३
पाप्मनाशनम् ६-२६; पाशमोचनम् १-१०, ३१;२-१०; ६-११२, ११९; ७-८३; बन्धमोचनम् ७-७८
मन्याविनाशम् ६।२५; शापनाशनम् ६-३७
शापमोचनम् २-७, ७-५९

अन्नादिकम् ।

अन्नम्६-७१;७-५८; अन्नसमृद्धिः ६-१४२;ओदन: ११-३;
पञ्चौदनो अजः ९-५; ब्रह्मौदनम् ४-३४; ११-१
मधुमदन्नम्६-११६; वासः७।३७; वृष्टिः ४।१५; ७-१८;
स्वर्गौदनः १२-३

सुखसंपत्प्राप्तिः ।

प्रीतिसंजननम् ६-८९; भगप्राप्तिः ६-१२९
शर्म १९-१९; शर्मप्राप्तिः १-२६
शान्तिः ३-२१; समृद्धिप्राप्तिः ३-२४
संनतिः ४-३९; सुखम् ७-६९
हिरण्यधारणम् १९-२६

(३) अधिदैवतप्रकरणम् ।

अग्नाविष्णू७।२९; अग्निः ५।२७;६।४९;७।७१,८२;२०।१ (३);२०।२(२);२०।१३(३-४);६७(३),१०१-१०३
अग्निः सत्यौजाः ४।३६; अग्निः सपत्नहा २।६
,, क्षत्रभृत्७।८४; अथर्वाणः १९।२३; अदितिः ७।६
आदित्याः ७।७; अनुमतिः ७।२०; अश्विनौ २०।१२५ (४-५),१३९-१४३; इडा ७।२७; इन्द्रः ६।३३;७।७२; २०।१(१),२(३);३-१२,१४-१५,१७-३९,४१-४६, ४७(१-१२);५०-५७;५८ (१-२),५९-६६,६७(१), ६८-८७,८९,९२-९५,९६ (१-५), ९७-१००,१०४- १०६,१०७(१-१३), १०८-१२२;१२४;१२५ (१-३, ६-७), १२६,१३७(२,७-१४);१३८; इन्द्रःजेता ६।२,
इंद्रः त्राता ७।८६; इंद्रः सुत्रामा ७।९१,९२
इन्द्रस्य वीर्याणि २।५; इन्द्राबृहस्पती २०।१३(१)
इन्द्राविष्णू ७।४४; इन्द्रोमरुतश्च २०।४०(१)
उषा १९।१२; कुहू ७।४७; छन्दांसि १९।२१
जातवेदाः१९।३; देवपत्न्यः ७।४९;द्रविणोदाः२०।२(४)
नक्षत्राणि १९।७,८; पावमानम् ६।१९,६२
पूषा स्वतिदाः ७।९; बृहस्पतिः २०।१६,८८,९०,९१
मरुतः २०।१(२);२(१);१३(२),४०(२-३);६७(२)
राका७।४८; रुद्रः११।२; विद्युत् १।१३; विष्णुः७।२५,२६
वैश्वानरः ६।३५,३६; सरस्वती ७।१०,११,५७,६८
सरस्वान् ७।४०; सविता ७।१४,१५,१६,२४
सिनीवाली ७।४६; सुपर्णः ७।४१; सूर्यः २०।४७ (१३-२१),४८,५८(३-४),१०७(१४-१५),१२३
गौः २०।४८; सूर्याचन्द्रमसौ ७।८१
सोमः पवमानः २०।१३७।(४-६)

खिलानि ।

कुन्तापसूक्तानि २०।१२७-१३७; खिलम् २०।४९

यज्ञादिकम् ।

ऋतस्य यज्ञः ५।१२; घर्मः ७।७३
तपः ७।६१; दर्भः १९।३२,३३
नवशालायां घृतहोमः ५।२६; पितृमेधः १८।१,२,३,४
यज्ञः ७।९७;१९।१,५८,५९; वेदी ७।९९; हविः ७।९८

कालः ।

अमावास्या ७।७९; कालः १९।५३,५४
पूर्णिमा ७।८०; रात्रिः १९।४७,४८,४९,५०

पश्वादिकम् ।

अघ्न्या ६-७०;७-७५; अश्वः १९-२५; ऋषभः ९-४
गावः४-२१; गोकर्णयोर्लक्ष्मकरणम्६-१४१; गोष्ठः ३-१४
गौः ६-३१;७-१०४;९।७; दधिक्राः २०-१३७(३)
पशवः २-३४; पशुपोषणम् ३-२८; पशुसंवर्धनम् २-२६
ब्रह्मगवी ५-१८,१९; १२-५; वशा गौः १०-१०;१२-४
वाजी ६-९२; शतौदना गौः १०-९

वैश्यव्यवसायः ।

कृषिः ३-१७; वाणिज्यम् ३-१५

अथर्ववेदे काण्डानुसारेण मन्त्रसंख्या।

काण्डं	प्रपाठकः	सूक्तानि	कांडे सूक्तानि	मंत्रसंख्या	कांडे मंत्रसंख्या	पृष्ठानि
१	१	१६		७४		१— ७
	२	१९	३५	७९	१५३	७— १४
२	३	१७		९९		१५— २२
	४	१९	३६	१०८	२०७	२२— ३१
३	५	१५		१११		३२— ४१
	६	१६	३१	११९	२३०	४२— ५२
४	७	२०		१६९		५३— ६७
	८	१०		७१		६७— ७३
	९	१०	४०	८४	३२४	७३— ८०
५	१०	७		७२		८१— ८६
	११	८		८२		८७— ९३
	१२	१६	३१	२२२	३७६	९३—१०९
६	१३	५१		१५८		११०—१२३
	१४	५१		१५७		१२३—१३७
	१५	४०	१४२	१३९	४५४	१३७—१४८
७	१६	५९		१३६		१४९—१६२
	१७	५९	११८	१५०	२८६	१६२—१७५
८	१८	५		१२२		१७६—१८५
	१९	५	१०	१७१	२९३	१८५—१९५
९	२०	५		१४२		१९६—२०७
	२१	५	१०	१७१	३१३	२०७—२१८
१०	२२	५		१६६		२१९—२३१
	२३	५	१०	१८४	३५०	२३१—२४४
११	२४	५		१७६		२४५—२५९
	२५	४	९	१३७	३१३	२५९—२६८
१२	२६	३ (३०)		१४८		२६९—२८०
	२७	२	५	१५६	३०४	२८०—२९०
१३	२८	४	४	१८८	१८८	२९१—३०४
१४	२९	२	२	१३९	१३९	३०५—३१४
१५	३०	१८	१८	२२०	२२०	३१५—३२६
१६	३१	९	९	१०३	१०३	३२७—३३५
१७	३२	१	१	३०	३०	३३६—३३९
१८	३३	२		१२१		३४०—३४८
	३४	२	४	१६२	२८३	३४८—३६०
१९	३५	७२	७२	४५३	४५३	३६१—३९
२०	३६	१४३	१४३	९५८	९५८	३९३—४५६
सर्वयोगः २०	३६	७३०	७३०	५९७७	५९७७	परिशिष्टस्य ४५७-५२

ॐ

अथर्ववेद-संहिता ।

प्रथमं काण्डम् ।

(१) मेधाजननम् ।

१-४ अथर्वा । वाचस्पतिः । अनुष्टुप्, ४ चतुष्पदा विराडुरोबृहती ।

[अथ प्रथमः प्रपाठकः॥१॥]

अनुवाकाङ्कः [१] ॐ ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।
वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे ॥ १ ॥
पुनरेहि वाचस्पते देवेन मनसा सह ।
वसोष्पते नि रमय मय्येवास्तु मयि श्रुतम् ॥ २ ॥
इहैवाभि वि तनूभे आर्त्नी इव ज्यया ।
वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम् ॥ ३ ॥
उपहूतो वाचस्पतिरुपास्मान्वाचस्पतिर्ह्वयताम् ।
सं श्रुतेन गमेमहि मा श्रुतेन वि राधिषि ॥ ४ ॥ (४)

(२) रोगोपशमनम् ।

१-४ अथर्वा । पर्जन्यः (पृथिवी, इन्द्रः, चन्द्रमाश्च) । अनुष्टुप्, ३ त्रिपदा विराण्नामगायत्री ।

विद्मा शरस्य पितरं पर्जन्यं भूरिधायसम् ।
विद्मो ष्वस्य मातरं पृथिवीं भूरिवर्पसम् ॥ १ ॥
ज्याके परि णो नमाश्मानं तन्वं कृधि ।
वीडुर्वरीयोऽरातीरप द्वेषांस्या कृधि ॥ २ ॥
वृक्षं यद्गावः परिषस्वजाना अनुस्फुरं शरमर्चन्त्यृभुम् ।
शरुमस्मद्यावय दिद्युमिन्द्र ॥ ३ ॥
यथा द्यां च पृथिवीं चान्तस्तिष्ठति तेजनम् ।
एवा रोगं चास्रावं चान्तस्तिष्ठतु मुञ्ज इत् ॥ ४ ॥ (८)

(३) मूत्रमोचनम् ।

१-९ अथर्वा । १ पर्जन्यः, २ मित्रः, ३ वरुणः, ४ चन्द्रः, ५ सूर्यः, (१-९ मूत्रमोचनम्) ।
अनुष्टुप्, १-५ पथ्यापङ्क्तिः ।

विद्मा शरस्य पितरं पर्जन्यं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥ १ ॥
विद्मा शरस्य पितरं मित्रं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥ २ ॥
विद्मा शरस्य पितरं वरुणं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥ ३ ॥
विद्मा शरस्य पितरं चन्द्रं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥ ४ ॥
विद्मा शरस्य पितरं सूर्यं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥ ५ ॥
यदान्त्रेषु गवीन्योर्यद्वस्तावधि संश्रुतम् ।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥ ६ ॥
प्र ते भिनद्मि मेहनं वर्त्रं वेशन्त्या इव ।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥ ७ ॥
विषितं ते वस्तिबिलं समुद्रस्योदधेरिव ।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥ ८ ॥
यथेषुका परापतदवसृष्टाधि धन्वनः ।
एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥ ९ ॥ (१७)

(४) अपां भेषजम् ।

१-४ सिन्धुद्वीपः । (अपांनपात्, सोमः,) आपः । गायत्री, ४ पुरस्ताद्बृहती ।

अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयताम् । पृञ्चतीर्मधुना पयः ॥ १ ॥
अमूर्या उप सूर्ये याभिर्वा सूर्यः सह । ता नो हिन्वन्त्वध्वरम् ॥ २ ॥
अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः । सिन्धुभ्यः कर्त्वं हविः ॥ ३ ॥
अप्स्व१न्तरमृतमप्सु भेषजम् ।
अपामुत प्रशस्तिभिरश्वा भवथ वाजिनो गावो भवथ वाजिनीः ॥ ४ ॥ (२१)

(५) अपां भेषजम् ।

१-४ सिन्धुद्वीपः । (अपांनपात्, सोमः,) आपः । गायत्री, ४ वर्धमाना ।

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ १ ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ २ ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ ३ ॥
ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम् । अपो याचामि भेषजम् ॥ ४ ॥ (२५)

(६) अपां भेषजम् ।

१-४ सिन्धुद्वीपः, (अथर्वा कृतिर्वा) । (अपांनपात्,) आपः, २ आपः सोमोऽग्निश्च । गायत्री, ४ पथ्यापङ्क्तिः ।

शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः ॥ १ ॥
अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा । अग्निं च विश्वशंभुवम् ॥ २ ॥
आपः पृणीत भेषजं वरूथं तन्वे३ मम । ज्योक् च सूर्यं दृशे ॥ ३ ॥
शं न आपो धन्वन्या३ः शमु सन्त्वनूप्याः ।
शं नः खनित्रिमा आपः शमु याः कुम्भ आभृताः शिवा नः सन्तु वार्षिकीः ॥ ४ ॥ (२९)

॥ इति प्रथमोऽनुवाकः ॥१॥

(७) यातुधाननाशनम् ।

१-७ चातनः । अग्निः (जातवेदाः), ३ अग्नीन्द्रौ । अनुष्टुप्, ५ त्रिष्टुप् ।

[२] स्तुवानमग्न आ वह यातुधानं किमीदिनम् ।
त्वं हि देव वन्दितो हन्ता दस्योर्बभूविथ ॥ १ ॥
आज्यस्य परमेष्ठिन् जातवेदस्तनूवशिन् ।
अग्ने तौलस्य प्राशान यातुधानान् वि लापय ॥ २ ॥
वि लपन्तु यातुधाना अत्त्रिणो ये किमीदिनः ।
अथेदमग्ने नो हविरिन्द्रश्च प्रति हर्यतम् ॥ ३ ॥
अग्निः पूर्व आ रभतां प्रेन्द्रो नुदतु बाहुमान् ।
ब्रवीतु सर्वो यातुमानयमस्मीत्येत्य ॥ ४ ॥
पश्याम ते वीर्यं जातवेदः प्र णो ब्रूहि यातुधानान्नृचक्षः ।
त्वया सर्वे परितप्ताः पुरस्तात्त आ यन्तु प्रब्रुवाणा उपेदम् ॥५॥ (३४)

आ रभस्व जातवेदोऽस्माकार्थाय जज्ञिषे ।
दूतो नो अग्ने भूत्वा यातुधानान् वि लापय ॥ ६ ॥
त्वमग्ने यातुधानानुपबद्धाँ इहा वह ।
अथैषामिन्द्रो वज्रेणापि शीर्षाणि वृश्चतु ॥ ७ ॥ (३६)

(८) यातुधाननाशनम् ।

१-४ चातनः । १-२ बृहस्पतिः, अग्नीषोमौ च; ३-४ अग्निः (जातवेदाः) । १-३ अनुष्टुप्, ४ बार्हतगर्भा त्रिष्टुप् ।

इदं हविर्यातुधानान् नदी फेनमिवा वहत् ।
य इदं स्त्री पुमानकरिह स स्तुवतां जनः ॥ १ ॥
अयं स्तुवान आगमदिमं स्म प्रति हर्यत ।
बृहस्पते वशे लब्ध्वाग्नीषोमा वि विध्यतम् ॥ २ ॥
यातुधानस्य सोमप जहि प्रजां नयस्व च ।
नि स्तुवानस्य पातय परमक्ष्युतावरम् ॥ ३ ॥
यत्रैषामग्ने जनिमानि वेत्थ गुहा सतामत्त्रिणां जातवेदः ।
तांस्त्वं ब्रह्मणा वावृधानो जह्येषां शततर्हमग्ने ॥ ४ ॥ (४०)

(९) विजयाय प्रार्थना ।

१-४ अथर्वा । १ वसवः, इन्द्रः, पूषा, वरुणः, मित्रः, अग्निः, आदित्याः, विश्वे देवाः; २ देवाः; सूर्यः, अग्निः, हिरण्यं, ३-४ अग्निः (जातवेदाः) । त्रिष्टुप् ।

अस्मिन्वसु वसवो धारयन्त्विन्द्रः पूषा वरुणो मित्रो अग्निः ।
इममादित्या उत विश्वे च देवा उत्तरस्मिन् ज्योतिषि धारयन्तु ॥१॥
अस्य देवाः प्रदिशि ज्योतिरस्तु सूर्यो अग्निरुत वा हिरण्यम् ।
सपत्ना अस्मदधरे भवन्तूत्तमं नाकमधि रोहयेमम् ॥ २ ॥
येनेन्द्राय समभरः पयांस्युत्तमेन ब्रह्मणा जातवेदः ।
तेन त्वमग्न इह वर्धयेमं सजातानां श्रैष्ठ्य आ धेह्येनम् ॥ ३ ॥
ऐषां यज्ञमुत वर्चो ददेऽहं रायस्पोषमुत चित्तान्यग्ने ।
सपत्ना अस्मदधरे भवन्तूत्तमं नाकमधि रोहयेमम् ॥ ४ ॥ (४४)

(१०) पाश-विमोचनम् ।

१-४ अथर्वा । १ असुरः, २-४ वरुणः । त्रिष्टुप्, ३ ककुम्मती अनुष्टुप्, ४ अनुष्टुप् ।

अयं देवानामसुरो वि राजति वशा हि सत्या वरुणस्य राज्ञः ।
ततस्परि ब्रह्मणा शाशदान उग्रस्य मन्योरुदिमं नयामि ॥ १ ॥
नमस्ते राजन्वरुणास्तु मन्यवे विश्वं ह्युग्र निचिकेषि द्रुग्धम् ।
सहस्रमन्यान्प्र सुवामि साकं शतं जीवाति शरदस्तवायम् ॥ २ ॥
यदुवक्थानृतं जिह्वया वृजिनं बहु ।
राज्ञस्त्वा सत्यधर्मणो मुञ्चामि वरुणादहम् ॥ ३ ॥
मुञ्चामि त्वा वैश्वानरादर्णवान्महतस्परि ।
सजातानुग्रेहा वद ब्रह्म चाप चिकीहि नः ॥ ४ ॥ (४८)

(११) नारी-सुखप्रसूतिः ।

१-६ अथर्वा । पूषा, अर्यमा, वेधाः, दिशः, देवाः । पङ्क्तिः, २ अनुष्टुप्, ३ चतुष्पदोष्णिग्गर्भा ककुम्मत्यनुष्टुप्, ४-६ पथ्यापङ्क्तिः ।

वषट् ते पूषन्नस्मिन्त्सूतावर्यमा होता कृणोतु वेधाः ।
सिस्रतां नार्यृतप्रजाता वि पर्वाणि जिहतां सूतवा उ ॥ १ ॥
चतस्रो दिवः प्रदिशश्चतस्रो भूम्या उत ।
देवा गर्भं समैरयन् तं व्यूर्णुवन्तु सूतवे ॥ २ ॥
सूषा व्यूर्णोतु वि योनिं हापयामसि ।
श्रथया सूषणे त्वमव त्वं बिष्कले सृज ॥ ३ ॥
नेव मांसे न पीवसि नेव मज्जस्वाहतम् ।
अवैतु पृश्नि शेवलं शुने जराय्वत्तवेऽव जरायु पद्यताम् ॥ ४ ॥
वि ते भिनद्मि मेहनं वि योनिं वि गवीनिके ।
वि मातरं च पुत्रं च वि कुमारं जरायुणाव जरायु पद्यताम् ॥ ५ ॥
यथा वातो यथा मनो यथा पतन्ति पक्षिणः ।
एवा त्वं दशमास्य साकं जरायुणा पतावं जरायु पद्यताम् ॥ ६ ॥ (५४)

॥ इति द्वितीयोऽनुवाकः ॥ २ ॥

(१२) यक्ष्मनाशनम् ।

१-४ भृग्वङ्गिराः । यक्ष्मनाशनम् । जगती (त्रिष्टुप् ?), ४ अनुष्टुप् ।

[३] जरायुजः प्रथम उस्रियो वृषा वातभ्रजा स्तनयन्नेति वृष्ट्या ।
स नो मृडाति तन्व ऋजुगो रुजन् य एकमोजस्त्रेधा विचक्रमे ॥ १ ॥
अङ्गेअङ्गे शोचिषा शिश्रियाणं नमस्यन्तस्त्वा हविषा विधेम ।
अङ्कान्त्समङ्कान् हविषा विधेम यो अग्रभीत्पर्वास्या ग्रभीता ॥ २ ॥
मुञ्च शीर्षक्त्या उत कास एनं परुष्परुराविवेशा यो अस्य ।
यो अभ्रजा वातजा यश्च शुष्मो वनस्पतीन्त्सचतां पर्वतांश्च ॥ ३ ॥
शं मे परस्मै गात्राय शमस्त्ववराय मे ।
शं मे चतुर्भ्यो अङ्गेभ्यः शमस्तु तन्वे मम ॥ ४ ॥ (५८)

(१३) विद्युत् ।

१-४ भृग्वङ्गिराः । विद्युत् । अनुष्टुप्, ३ चतुष्पाद्विराड् जगती, ४ त्रिष्टुप्परा बृहतीगर्भा पङ्क्तिः ।

नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे ।
नमस्ते अस्त्वश्मने येना दूडाशे अस्यसि ॥ १ ॥
नमस्ते प्रवतो नपाद्यतस्तपः समूहसि ।
मृडया नस्तनूभ्यो मयस्तोकेभ्यस्कृधि ॥ २ ॥
प्रवतो नपान्नम एवास्तु तुभ्यं नमस्ते हेतये तपुषे च कृण्मः ।
विद्म ते धाम परमं गुहा यत्समुद्रे अन्तर्निहितासि नाभिः ॥ ३ ॥
यां त्वा देवा असृजन्त विश्व इषुं कृण्वाना असनाय धृष्णुम् ।
सा नो मृड विदथे गृणाना तस्यै ते नमो अस्तु देवि ॥ ४ ॥ (६२)

(१४) कुलपा कन्या ।

१-४ भृग्वङ्गिराः । (वरुणो), यमो (वा) । अनुष्टुप्, १ ककुम्मती अनुष्टुप्, ३ चतुष्पाद्विराट् ।

भगमस्या वर्च आदिष्यधि वृक्षादिव स्रजम् ।
महाबुध्न इव पर्वतो ज्योक् पितृष्वास्ताम् ॥ १ ॥
एषा ते राजन्कन्या वधूर्नि धूयतां यम ।
सा मातुर्बध्यतां गृहेऽथो भ्रातुरथो पितुः ॥ २ ॥ (६४)

एषा ते कुलपा राजन्तामु ते परि दद्मसि ।
ज्योक् पितृष्वासाता आ शीर्ष्णः समोप्यात् ॥ ३ ॥
असितस्य ते ब्रह्मणा कश्यपस्य गयस्य च ।
अन्तःकोशमिव जामयोऽपि नह्यामि ते भगम् ॥ ४ ॥ (६६)

(१५) पुष्टिकर्म ।

१-४ अथर्वा । सिन्धवः, (वाताः, पतत्रिणः) । अनुष्टुप्, २ भुरिक्पथ्या पङ्क्तिः ।

सं सं स्रवन्तु सिन्धवः सं वाताः सं पतत्रिणः ।
इमं यज्ञं प्रदिवो मे जुषन्तां संस्राव्येण हविषा जुहोमि ॥ १ ॥
इहैव हवमा यात म इह संस्रावणा उतेमं वर्धयता गिरः ।
इहैतु सर्वो यः पशुरस्मिन् तिष्ठतु या रयिः ॥ २ ॥
ये नदीनां संस्रवन्त्युत्सासः सदमक्षिताः ।
तेभिर्मे सर्वैः संस्रावैर्धनं सं स्रावयामसि ॥ ३ ॥
ये सर्पिषः संस्रवन्ति क्षीरस्य चोदकस्य च ।
तेभिर्मे सर्वैः संस्रावैर्धनं सं स्रावयामसि ॥ ४ ॥ (७०)

(१६) शत्रुबाधनम् ।

१-४ चातनः । १ अग्निः, २ इन्द्रः, वरुणः, (३-४ दधत्यं सीसम्) । अनुष्टुप्, ४ ककुम्मती अनुष्टुप् ।

येऽमावास्यां रात्रिमुदस्थुर्व्राजमत्त्रिणः ।
अग्निस्तुरीयो यातुहा सो अस्मभ्यमधि ब्रवत् ॥ १ ॥
सीसायाध्याह वरुणः सीसायाग्निरुपावति ।
सीसं म इन्द्रः प्रायच्छत्तदङ्ग यातुचातनम् ॥ २ ॥
इदं विष्कन्धं सहत इदं बाधते अत्त्रिणः ।
अनेन विश्वा ससहे या जातानि पिशाच्याः ॥ ३ ॥
यदि नो गां हंसि यद्यश्वं यदि पूरुषम् ।
तं त्वा सीसेन विध्यामो यथा नोऽसो अवीरहा ॥ ४ ॥ (७४)

॥ इति तृतीयोऽनुवाकः ॥३॥ [इति प्रथमः प्रपाठकः॥१॥]

(१७) रुधिरस्रावनिवृत्तये धमनीबन्धनम् ।

[अथ द्वितीयः प्रपाठकः॥२॥] १-४ ब्रह्मा । योषितः धमन्यश्च । अनुष्टुप्, १ भुरिगनुष्टुप्, ४ त्रिपदार्षी गायत्री ।

[४] अमूर्या यन्ति योषितो हिरा लोहितवाससः ।
अभ्रातर इव जामयस्तिष्ठन्तु हतवर्चसः ॥ १ ॥ (७५)

तिष्ठावरे तिष्ठ पर उत त्वं तिष्ठ मध्यमे ।
कनिष्ठिका च तिष्ठति तिष्ठादिद्धमनिर्मही ॥ २ ॥
शतस्य धमनीनां सहस्रस्य हिराणाम् ।
अस्थुरिन्मध्यमा इमाः साकमन्ता अरंसत ॥ ३ ॥
परि वः सिकतावती धनूर्बृहत्यक्रमीत् । तिष्ठतेलयता सु कम् ॥४॥ (७८)

(१८) अलक्ष्मीनाशनम् ।

१-४ द्रविणोदाः । विनायकः (२ सविता, वरुणः, मित्रः, अर्यमा, देवाः; ३ सविता) ।
१ विराडुपरिष्टाद्बृहती, २ निचृज्जगती, ३ विराडास्तारपङ्क्तिस्त्रिष्टुप्, ४ अनुष्टुप् ।

निर्लक्ष्म्यं ललाम्यं१ निररातिं सुवामसि ।
अथ या भद्रा तानि नः प्रजाया अरातिं नयामसि ॥ १ ॥
निररणिं सविता साविषक् पदोर्निर्हस्तयोर्वरुणो मित्रो अर्यमा ।
निरस्मभ्यमनुमती रराणा प्रेमां देवा असाविषुः सौभगाय ॥ २ ॥
यत्त आत्मनि तन्वां घोरमस्ति यद्वा केशेषु प्रतिचक्षणे वा ।
सर्वं तद्वाचाप हन्मो वयं देवस्त्वा सविता सूदयतु ॥ ३ ॥
रिश्यपदीं वृषदतीं गोषेधां विधमामुत ।
विलीढ्यं ललाम्यं१ ता अस्मन्नाशयामसि ॥ ४ ॥ (८२

(१९) शत्रुनिवारणम् ।

१-४ ब्रह्मा । ईश्वरः, (१ इन्द्रः, २ मनुष्येषवः, ३ रुद्रः, ४ देवाः) । अनुष्टुप्,
२ पुरस्ताद्बृहती, ३ पथ्यापङ्क्तिः ।

मा नो विदन् विव्याधिनो मो अभिव्याधिनो विदन् ।
आराच्छरव्या अस्मद्विषूचीरिन्द्र पातय ॥ १ ॥
विष्वञ्चो अस्मच्छरवः पतन्तु ये अस्ता ये चास्याः ।
दैवीर्मनुष्येषवो ममामित्रान् वि विध्यत ॥ २ ॥
यो नः स्वो यो अरणः सजात उत निष्ट्यो यो अस्माँ अभिदासति ।
रुद्रः शरव्ययैतान् ममामित्रान् वि विध्यतु ॥ ३ ॥
यः सपत्नो योऽसपत्नो यश्च द्विषन् छपाति नः ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥ ४ ॥ (८

(२०) शत्रुनिवारणम् ।

१-४ अथर्वा । १ सोमः, मरुतः; २ मित्रावरुणौ, ३ वरुणः, ४ इन्द्रः । अनुष्टुप्, १ त्रिष्टुप् ।

अदा॑रसृद् भवतु देव सोमास्मिन्य॒ज्ञे म॑रुतो मृडता॑ नः ।
मा नो॑ विददभि॒भा मो अश॑स्ति॒र्मा नो॑ विदद् वृजि॒ना द्वेष्या॒ या ॥१॥

यो अ॒द्य सेन्यो॑ व॒धोऽ॑घायू॒ना॑मु॒दीर॑ते ।
यु॒वं तं मि॑त्रावरुणाव॒स्मद्या॑वयतं॒ परि॑ ॥ २ ॥

इ॒तश्च॒ यद॒मुत॑श्च॒ यद्व॒धं वरुण यावय ।
वि म॒हच्छर्म॑ यच्छ॒ वरी॑यो यावया व॒धम् ॥ ३ ॥

शा॒स इ॒त्था म॒हाँ अ॑स्यमित्रसा॒हो अ॑स्तृ॒तः ।
न यस्य॑ ह॒न्यते॒ सखा॒ न जी॒यते॑ क॒दा च॒न ॥ ४ ॥ (९०)

(२१) शत्रुनिवारणम् ।

१-४ अथर्वा । इन्द्रः । अनुष्टुप् ।

स्व॒स्ति॒दा वि॒शां पति॑र्वृत्र॒हा वि॑मृ॒धो व॒शी ।
वृषेन्द्रः॑ पु॒र ए॑तु नः सोम॒पा अ॑भयंक॒रः ॥ १ ॥

वि न॑ इन्द्र मृधो॑ जहि नी॒चा य॑च्छ पृतन्य॒तः ।
अ॒ध॒मं ग॑मया॒ तमो॒ यो अ॒स्माँ अ॑भि॒दास॑ति ॥ २ ॥

वि रक्षो॒ वि मृधो॑ जहि॒ वि वृ॒त्रस्य॒ हनू॑ रुज ।
वि म॒न्युमि॑न्द्र वृत्रहन्न॒मित्र॑स्याभि॒दास॑तः ॥ ३ ॥

अपे॑न्द्र द्विष॒तो मनोऽ॑प॒ जिज्या॑सतो व॒धम् ।
वि म॒हच्छर्म॑ यच्छ॒ वरी॑यो यावया व॒धम् ॥ ४ ॥ (९४)

॥ इति चतुर्थोऽनुवाकः ॥४॥

(२२) हृद्रोग-कामिलानाशनम् ।

१-४ ब्रह्मा । सूर्यो, हरिमा हृद्रोगश्च । अनुष्टुप् ।

[५] अनु॑ सू॒र्य॒मुद॑यतां हृद्द्यो॒तो ह॑रि॒मा च॑ ते ।
गो रोहि॑तस्य॒ वर्णे॑न॒ तेन॑ त्वा॒ परि॑ दध्मसि ॥ १ ॥

परि॑ त्वा॒ रोहि॑तै॒र्वर्णै॑र्दीर्घायु॒त्वाय॑ दध्मसि ।
य॒थाय॑म॒रपा अ॒स॒दथो॒ अह॑रितो॒ भुव॑त् ॥ २ ॥

या रोहि॑णीर्दे॒वत्या॒३॒॑ गावो॒ या उ॒त रोहि॑णीः ।
रू॒पंरू॑पं॒ वयो॑वय॒स्ताभि॑ष्ट्वा॒ परि॑ दध्मसि ॥ ३ ॥ (९७)

शुकेषु ते हरिमाणं रोपणाकासु दध्मसि ।
अथो हारिद्रवेषु ते हरिमाणं नि दध्मसि ॥ ४ ॥ (९८)

(२३) श्वेतकुष्ठनाशनम् ।

१-४ अथर्वा । वनस्पतिः (असिक्निः) । अनुष्टुप् ।

नक्तंजातास्योषधे रामे कृष्णे असिक्नि च ।
इदं रजनि रजय किलासं पलितं च यत् ॥ १ ॥
किलासं च पलितं च निरितो नाशया पृषत् ।
आ त्वा स्वो विशतां वर्णः परा शुक्लानि पातय ॥ २ ॥
असितं ते प्रलयनमास्थानमसितं तव ।
असिक्न्यस्योषधे निरितो नाशया पृषत् ॥ ३ ॥
अस्थिजस्य किलासस्य तनूजस्य च यत्त्वचि ।
दूष्या कृतस्य ब्रह्मणा लक्ष्म श्वेतमनीनशम् ॥ ४ ॥ (१०२)

(२४) श्वेतकुष्ठनाशनम् ।

१-४ ब्रह्मा । आसुरी वनस्पतिः । अनुष्टुप्, २ निचृत्पथ्यापङ्क्तिः ।

सुपर्णो जातः प्रथमस्तस्य त्वं पित्तमासिथ ।
तदासुरी युधा जिता रूपं चक्रे वनस्पतीन् ॥ १ ॥
आसुरी चक्रे प्रथमेदं किलासभेषजमिदं किलासनाशनम् ।
अनीनशत्किलासं सरूपामकरत्त्वचम् ॥ २ ॥
सरूपा नाम ते माता सरूपो नाम ते पिता ।
सरूपकृत्त्वमोषधे सा सरूपमिदं कृधि ॥ ३ ॥
श्यामा सरूपंकरणी पृथिव्या अध्युद्भृता ।
इदमू षु प्र साधय पुना रूपाणि कल्पय ॥ ४ ॥ (१०६)

(२५) ज्वर-नाशनम् ।

१-४ भृग्वङ्गिराः । यक्ष्मनाशनोऽग्निः । त्रिष्टुप्, २-३ विराड्गर्भा, ४ पुरोऽनुष्टुप् ।

यदग्निरापो अदहत्प्रविश्य यत्राकृण्वन् धर्मधृतो नमांसि ।
तत्र त आहुः परमं जनित्रं स नः संविद्वान् परि वृङ्ग्धि तक्मन् ॥ १ ॥
यद्यर्चिर्यदि वासि शोचिः शकल्येषि यदि वा ते जनित्रम् ।
ह्रूडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्ग्धि तक्मन् ॥ २ ॥

यदि॑ शो॒को यदि॑ वाभिशो॒को यदि॑ वा॒ राज्ञो॒ वरु॑णस्यासि॑ पु॒त्रः ।
हूडु॒र्नामा॑सि हरितस्य देव॒ स नः॑ संवि॒द्वान् परि॑ वृङ्ग्धि तक्मन् ॥ ३ ॥
नमः॑ शी॒ताय॑ त॒क्मने॒ नमो॑ रू॒राय॑ शो॒चिषे॑ कृणोमि ।
यो अ॑न्येद्यु॒रुभयद्यु॒र॒भ्येति॑ तृ॒तीय॑काय॒ नमो॑ अस्तु त॒क्मने॑ ॥ ४ ॥ (११०)

(२६) शर्मप्राप्तिः ।

१-४ ब्रह्मा । १ देवाः; २ इन्द्रः, भगः, सविता, ३-४ मरुतः । गायत्री; २ त्रिपदा एकावसाना साम्नी त्रिष्टुप्, ४ एकावसाना पादनिचृत् ।

आरे॒३॒॑सावस्मद॑स्तु हे॒तिर्दे॑वासो असत् । आ॒रे अश्मा॒ यमस्य॑थ ॥ १ ॥
सखा॒साव॒स्मभ्य॑मस्तु रा॒तिः सखेन्द्रो॒ भगः॑ सवि॒ता चि॒त्ररा॑धाः ॥ २ ॥
यू॒यं नः॑ प्रवतो नपा॒न्मरु॑तः सूर्य॑त्वचसः । शर्म॑ यच्छाथ स॒प्रथाः॑ ॥ ३ ॥
सु॒षू॒दत॑ मृ॒डत॑ मृ॒डया॑ नस्त॒नूभ्यो॒ मय॑स्तो॒केभ्य॑स्कृधि ॥ ४ ॥ (११४)

(२७) स्वस्त्ययनम् ।

१-४ अथर्वा (स्वस्त्ययनकामः) । (चन्द्रमाः,) इन्द्राणी (च) । अनुष्टुप्, १ पथ्यापङ्क्तिः ।

अ॒मूः पा॒रे पृ॑दा॒क्व॑स्त्रिष॒प्ता निर्ज॑रायवः ।
तासां॑ ज॒रायु॑भिर्व॒यम॒क्ष्या॒३॒॑वपि॑ व्ययामस्यघा॒योः प॑रिप॒न्थिनः॑ ॥ १ ॥
विषू॑च्येतु कृ॒न्तती॒ पिना॑कमिव॒ बिभ्र॑ती ।
विष्व॑क्पुन॒र्भुवा॒ मनो॑ऽसमृद्धा अघा॒यवः॑ ॥ २ ॥
न ब॒हवः॒ सम॑शकन्ना॒र्भ॒का अ॒भि दा॑धृषुः ।
वे॒णोरद्गा॑ इवा॒भितो॑ऽसमृद्धा अघा॒यवः॑
प्रेतं॑ पादौ॒ प्र स्फु॑रतं॒ वह॑तं पृण॒तो गृ॒हान् ।
इ॒न्द्रा॒ण्ये॑तु प्रथ॒माजी॒तामु॑षिता पु॒रः (११८)

(२८) रक्षोघ्नम् ।

१-४ चातनः । १-२ अग्निः, ३-४ यातुधानीः । अनुष्टुप्, ३ विराट्पथ्याबृहती, ४ पथ्यापङ्क्तिः ।

उप॑ प्रागा॑द्दे॒वो अ॒ग्नी र॑क्षो॒हामी॑व॒चात॑नः ।
द॒हन्नप॑ द्वया॒विनो॑ यातु॒धाना॑न्किमी॒दिनः॑ ॥ १ ॥
प्रति॑ द॒ह यातु॒धाना॒न्प्रति॑ देव कि॒मी॒दिनः॑ ।
प्र॒ती॒चीः॑ कृष्णवर्त॒ने सं द॑ह यातु॒धा॒न्यः॑ ॥ २ ॥ (१२०)

या शशाप शपनेन याघं मूरमादधे ।
या रसस्य हरणाय जातमारेभे तोकमत्तु सा ॥ ३ ॥
पुत्रमत्तु यातुधानीः स्वसारमुत नप्त्यम् ।
अधा मिथो विकेश्यो वि घ्नतां यातुधान्यो वि तृह्यन्तामराय्यः ॥ ४ ॥ (१२२

॥ इति पञ्चमोऽनुवाकः ॥ ५

(२९) राष्ट्राभिवर्धनम्, सपत्नक्षयणं च ।

१-६ वसिष्ठः । ब्रह्मणस्पतिः, अभीवर्तमणिः । अनुष्टुप् ।

[६] अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे ।
तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय ॥ १ ॥
अभिवृत्य सपत्नानभि या नो अरातयः ।
अभि पृतन्यन्तं तिष्ठाभि यो नो दुरस्यति ॥ २ ॥
अभि त्वा देवः सविताभि सोमो अवीवृधत् ।
अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि ॥ ३ ॥
अभीवर्तो अभिभवः सपत्नक्षयणो मणिः ।
राष्ट्राय मह्यं बध्यतां सपत्नेभ्यः पराभुवे ॥ ४ ॥
उदसौ सूर्यो अगादुदिदं मामकं वचः ।
यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा ॥ ५ ॥
सपत्नक्षयणो वृषाभिराष्ट्रो विषासहिः ।
यथाहमेषां वीराणां विराजानि जनस्य च ॥ ६ ॥ (१२८

(३०) दीर्घायुःप्राप्तिः ।

१-४ अथर्वा (आयुष्कामः) । विश्वे देवाः (१ वसवः, आदित्याः, १-४ देवाः) ।
त्रिष्टुप्, ३ शाक्करगर्भा विराड्जगती ।

विश्वे देवा वसवो रक्षतेममुतादित्या जागृत यूयमस्मिन् ।
मेमं सनाभिरुत वान्यनाभिर्मेमं प्रापत् पौरुषेयो वधो यः ॥ १ ॥
ये वो देवाः पितरो ये च पुत्राः सचेतसो मे शृणुतेदमुक्तम् ।
सर्वेभ्यो वः परि ददाम्येतं स्वस्त्येनं जरसे वहाथ ॥ २ ॥
ये देवा दिवि ष्ठ ये पृथिव्यां ये अन्तरिक्ष ओषधीषु पशुष्वप्स्वन्तः ।
ते कृणुत जरसमायुरस्मै शतमन्यान्परि वृणक्तु मृत्यून् ॥ ३ ॥ (१३१

येषां प्रयाजा उत वानुयाजा हुतभागा अहुतादश्च देवाः ।
येषां वः पञ्च प्रदिशो विभक्तास्तान्वो अस्मै सत्रसदः कृणोमि ॥ ४ ॥ (१३२)

(३१) पाशमोचनम् ।

१-४ ब्रह्मा । आशापालाः, (वास्तोष्पतिः) । अनुष्टुप्, ३ विराट् त्रिष्टुप्, ४ परानुष्टुप् त्रिष्टुप् ।

आशानामाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः ।
इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयम् ॥ १ ॥
य आशानामाशापालाश्चत्वार स्थन देवाः ।
ते नो निर्ऋत्याः पाशेभ्यो मुञ्चतांहसोअंहसः ॥ २ ॥
अस्रामस्त्वा हविषा यजाम्यश्लोणस्त्वा घृतेन जुहोमि ।
य आशानामाशापालस्तुरीयो देवः स नः सुभूतमेह वक्षत् ॥ ३ ॥
स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः ।
विश्वं सुभूतं सुविदत्रं नो अस्तु ज्योगेव दृशेम सूर्यम् ॥ ४ ॥ (१३६)

(३२) महद्ब्रह्म ।

१-४ ब्रह्मा । द्यावापृथिवी । अनुष्टुप्, २ ककुम्मती अनुष्टुप् ।

इदं जनासो विदथ महद्ब्रह्म वदिष्यति ।
न तत्पृथिव्यां नो दिवि येन प्राणन्ति वीरुधः ॥ १ ॥
अन्तरिक्ष आसां स्थाम श्रान्तसदामिव ।
आस्थानमस्य भूतस्य विदुष्टद्वेधसो न वा ॥ २ ॥
यद्रोदसी रेजमाने भूमिश्च निरतक्षतम् ।
आर्द्रं तदद्य सर्वदा समुद्रस्येव स्रोत्याः ॥ ३ ॥
विश्वमन्यामभीवार तदन्यस्यामधिश्रितम् ।
दिवे च विश्ववेदसे पृथिव्यै चाकरं नमः ॥ ४ ॥ (१४०)

(३३) आपः ।

१-४ शन्तातिः । (चन्द्रमाः) आपः (च) । त्रिष्टुप् ।

हिरण्यवर्णाः शुचयः पावका यासु जातः सविता यास्वग्निः ।
या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥ १ ॥
यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम् ।
या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥ २ ॥ (१४२)

यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ।
या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥ ३ ॥
शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे ।
घृतश्चुतः शुचयो याः पावकास्ता न आपः शं स्योना भवन्तु ॥ ४ ॥ (१४४)

(३४) मधुविद्या ।

१-५ अथर्वा । मधुवनस्पतिः । अनुष्टुप् ।

इयं वीरुन्मधुजाता मधुना त्वा खनामसि ।
मधोरधि प्रजातासि सा नो मधुमतस्कृधि ॥ १ ॥
जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम् ।
ममेदह क्रतावसो मम चित्तमुपायसि ॥ २ ॥
मधुमन्मे निक्रमणं मधुमन्मे परायणम् ।
वाचा वदामि मधुमद् भूयासं मधुसंदृशः ॥ ३ ॥
मधोरस्मि मधुतरो मदुघान्मधुमत्तरः ।
मामित्किल त्वं वनाः शाखां मधुमतीमिव ॥ ४ ॥
परि त्वा परितत्नुनेक्षुणागामविद्विषे ।
यथा मां कामिन्यसो यथा मन्नापगा असः ॥ ५ ॥ (१४९)

(३५) दीर्घायुःप्राप्तिः ।

१-४ अथर्वा (आयुष्कामः) । हिरण्यम्, इन्द्राग्नी, विश्वे देवाः । जगती, ४ अनुष्टुब्गर्भा चतुष्पदा त्रिष्टुप् ।

यदाबध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ।
तत्ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय ॥ १ ॥
नैनं रक्षांसि न पिशाचाः सहन्ते देवानामोजः प्रथमजं ह्येतत् ।
यो बिभर्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायुः ॥ २ ॥
अपां तेजो ज्योतिरोजो बलं च वनस्पतीनामुत वीर्याणि ।
इन्द्र इवेन्द्रियाण्यधि धारयामो अस्मिन्तद्दक्षमाणो बिभरद्धिरण्यम् ॥ ३ ॥
समानां मासामृतुभिष्ट्वा वयं संवत्सरस्य पयसा पिपर्मि ।
इन्द्राग्नी विश्वे देवास्तेऽनु मन्यन्तामहृणीयमानाः ॥ ४ ॥ (१५३)

॥ इति षष्ठोऽनुवाकः ॥ ६ ॥

॥ इति प्रथमं काण्डं समाप्तम् ॥ ॥ इति द्वितीयः प्रपाठकः ॥२॥

[प्रथमकाण्डस्य मन्त्र-संख्या १५३]

द्वितीयं काण्डम् ।

